# विद्यावारिधिः (Ph.D)

# प्रवेशपरीक्षा - २०२१ निर्देशिका

## राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

(संसदः अधिनियमेन स्थापितः केन्द्रियविश्वविद्यालयः)

तिरुपतिः – ५१७ ५०७ आन्ध्रप्रदेशः

जालस्थानम् Website : http://nsktu.ac.in

Email- nsucet@gmail.com

# विषयानुक्रमणिका


| क्र.सं. | विषयः | पृ. सं. |
|---|---|---|
| 1. | राष्ट्रियसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः | 3 |
| 2. | विद्यावारिधिपाठ्यक्रमस्य (Ph.D. Program) संक्षिप्तपरिचयः | 3 |
| 3. | विश्वविद्यालयेन विद्यावारिधिपाठ्यक्रमे प्रस्तापिताः विषयाः | 4 |
| 4. | विद्यावारिधिपाठ्यक्रमे विद्यमानानि स्थानानि | 4 |
| 5. | आरक्षितस्थानानि | 4 |
| 6. | आरक्षितश्रेणीनां कृते प्रमाणपत्रदातारः अधिकारिणः | 4 |
| 7. | विद्यावारिधिप्रवेशपरीक्षायाः प्रमुखदिनाङ्काः (तात्कालिकाः) | 5 |
| 8. | विद्यावारिधिप्रवेशपरीक्षायाः कृते न्यूनतमयोग्यता<br>(अ) शास्त्रेषु विद्यावारिधिप्रवेशपरीक्षार्थं योग्यता<br>(आ) शिक्षायां विद्यावारिधिप्रवेशपरीक्षार्थं योग्यता | 6 |
| 9. | चयनप्रक्रिया | 7 |
| 10. | विद्यावारिधिपाठ्यक्रमस्य शुल्कः | 7 |
| 11. | छात्रावासस्य भोजनादीनाञ्च शुल्काः | 7 |
| 12. | विद्यवारिधिपाठ्यक्रमस्य अध्ययनकेन्द्रम् | 7 |
| 13. | विद्यावारिधिप्रवेशपरीक्षा (VVET) - २०२१  दिनाङ्कः समयश्च (तात्कालिकः) | 8 |
| 14. | अधितन्त्रीमाध्यमेन आवेदनार्थं निर्देशाः | 8 |
| 15. | कतिचन प्रमुखाः सूचनाः | 8 |
| 16. | प्रवेशपरीक्षायाः केन्द्राणि | 9 |
| 17. | प्रवेशपरीक्षापद्धतिः | 9 |
| 18. | प्रवेशपरीक्षार्थं  निर्दिष्टावधिः | 9 |

| | | |
|---|---|---|
| 19. | प्रवेशपरीक्षायाम् अवधेयाः सूचनाः | 9 |
| 20. | शास्त्राणां/विषयाणां प्रश्नपत्रप्रारूपम् | 10 |
| 21. | शिक्षायाः प्रश्नपत्रप्रारूपम् | 10 |
| 22. | मूल्याङ्कनविधिः उत्तीर्णतायै प्रतिशताङ्काश्च | 10 |
| 23. | फलितांशाः | 11 |
| 24. | विद्यावारिधिप्रवेशपरीक्षायाः पाठ्यक्रमः - 2021 | 11 |
| 25. | आदर्शप्रश्नाः (Links) | 16 |

## 1. राष्ट्रियसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः -

आन्ध्रप्रदेशेषु विद्यमाने तिरुपतिः इत्याख्ये विश्वप्रसिद्धक्षेत्रे स्थितं केन्द्रियसंस्कृतविद्यापीठं भारतसर्वकारेण घटितस्य संस्कृतायोगस्य अनुशंसनानुसारं 1961 तमे वर्षे पारम्परिकसंस्कृतसाहित्यस्य आधुनिकशोधशैल्या प्रचारप्रसारार्थं तिरुपतौ संस्थापितम् । अप्रैल 1971 तमे वर्षे राष्ट्रियसंस्कृतसंस्थानस्य संरक्षणे एषा संस्था शिक्षामन्त्रालयस्य स्वायत्तसंस्थारूपेण प्रतिष्ठापिता । 1987 तमे वर्षे विश्वविद्यालयानुदानायोगस्य (UGC) अधिनियमानुसारम् (1956) एतत् विद्यापीठं मानितविाश्वविद्यालयत्वेन घोषितम् । अत्र प्राक्-शास्त्रितः शास्त्री, आचार्य, विशिष्टाचार्य, विद्यावारिधिपर्यन्तं शास्त्राणामध्ययनार्थं छात्रावाससहिता व्यवस्था परिकल्पिता वर्तते । शिक्षाशास्त्री, शिक्षाचार्यः, विद्यवारिधिः(शिक्षा) इत्यादीनां व्यावसायिकशिक्षाणां प्रशिक्षणम् आधुनिकशैल्या प्रदीयते ।

विद्यापीठमिदं भारतसर्वकारस्य संसदः अधिनियमेन 2020 तमात् वर्षात् राष्ट्रियसंस्कृतविश्वविद्यालयत्वेन प्रोन्नतम् । अस्य विश्वविद्यालयस्य पाठ्यक्रमाः सर्वेऽपि UGC, NCTE इत्याभ्यां संस्थाभ्यां द्वारा नियमानुसारं विधिवत् प्राप्तमान्यताः सन्ति । 2015 तमे वर्षे अयं विश्वविद्यालयः NAAC द्वारा "ए" श्रेण्या (द्वितीयचक्रे) मूल्याङ्कनेन मान्यता प्राप्तासीत् ।

## 2. विद्यावारिधिपाठ्यक्रमस्य (Ph.D Program) संक्षिप्तपरिचयः -

विद्यावारिधिपाठ्यक्रमः **UGC, M.phil/Ph.D regulations-2016** नियमानुगुणं सामान्यतः वर्षत्रयात्मकः भवति ।

विद्यावारिधौ प्रविष्टछात्रस्य षाण्मासिकपाठ्यक्रमे (**6 Months - Course Work**) औपचारिकभागग्रहणम् अनिवार्यं लिखितपरीक्षा च भविष्यति । षाणमासिकपाठ्यक्रमानन्तरं शोधकार्यार्थं शोधच्छात्रेभ्यः मार्गदर्शकाः निर्दिष्टाः भविष्यन्ति । ततः स्वीयशास्त्रे/विषये मार्गदर्शकानां निर्देशानुसारं शोधविषयस्य/समस्यायाः चयनमध्ययनञ्च भविष्यति ।

अयं शोधोपाधिः **विद्यावारिधिः(Ph.D)** इति नाम्ना वर्तते । अस्य प्रमाणपत्रम् आङ्ग्लभाषानुवादसहितं संस्कृतेन राष्ट्रियसंस्कृतविश्वविद्यालयस्य दीक्षान्तसमारोहे / अन्यस्मिन् कास्मिंश्चित् समारोहे वा प्रदास्यते ।

## 3. विश्वविद्यालयेन विद्यावारिधिपाठ्यक्रमे प्रस्तापिताः विषयाः

विद्यावारिधिपाठ्यक्रमे अधोलिखिताः विषयाः भविष्यन्ति –

| Sl.No. | Name of Subject | Sl.No. | Name of Subject |
|---|---|---|---|
| 1. | साहित्यम् | 8. | द्वैतवेदान्तः |
| 2. | व्याकरणम् | 9. | आगमः |
| 3. | फलितज्योतिषम् | 10. | मीमांसा* |
| 4. | सिद्धान्तज्योतिषम् | 11. | सांख्ययोगः |
| 5. | न्यायः | 12. | वेदभाष्यम्* |
| 6. | अद्वैतवेदान्तः | 13. | शाब्दबोधः (न्याय-व्याकरण-मीमांसानुसारम्) |
| 7. | विशिष्टाद्वैतवेदान्तः | 14. | शिक्षाशास्त्रम् |

* **सूचना** - प्रवेशसमये इतोऽप्यधिकानि स्थानानि वर्धेरन् ।

## 4. विद्यावारिधिपाठ्यक्रमे विद्यमानानि स्थानानि -

विद्यावारिधिप्रवेशपरीक्षा - 2021 इतीयं राष्ट्रियसंस्कृतविश्वविद्यालयस्य विद्यावारिधिपाठ्यक्रमे प्रवेशार्थं भवति। परीक्षासम्बद्धाः अन्याश्च सूचनाः संस्कृतभाषामाध्यमेनैव भविष्यन्ति। राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः इत्यत्र 2021-22 इत्यस्मिन् शैक्षिकवर्षे विविधशास्त्रेषु/विषयेषु 59 स्थानानि वर्त्तन्ते। प्रवेशसमये इतोऽप्यधिकानि स्थानानि वर्धेरन्।

## 5. आरक्षितस्थानानि -

भारतसर्वकारस्य नियमानुसृत्य आरक्षणव्यवस्था वर्तते, यथा -

| Sl.. No. | Category | Reservation |
|---|---|---|
| 1 | अनुसूचितजातीयानाम् अभ्यर्थीनां कृते | 15% |
| 2 | अनुसूचितजनजातीयानाम् अभ्यर्थीनां कृते | 7.5% |
| 3 | अन्य-अप्रगतिजातीयानाम् अभ्यर्थीनां कृते (OBC) Non-creamy layer as per Central Govt. List. | 27% |
| 4 | अन्यथासक्षमाणाम् / प्रज्ञाचक्षुषाम् अभ्यर्थीनां कृते (PwD) | 3% |
| 5 | आर्थिकदुर्बलवर्गीयाणां कृते (EWS) | 10% |

## 6. आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः -

i. अनुसूचितजातीयानां / जनजातीयानां / अन्याप्रगतजातीयानां / आर्थिकदुर्बलवर्गीयानां कृते - जिल्लाधीशः / उपजिल्लाधीशः (एस.डी.एम.) / तहसीलदारः / MRO / सक्षमाधिकारी।

ii. अन्यथासक्षमाणाम् / प्रज्ञाचक्षुषां कृते सर्वकारीयचिकित्सालयस्य प्रधानचिकित्साधिकारी।

**(४० प्रतिशतविकलाङ्गता ततोऽधिका वा अर्हताऽधिकृता)।**

## 7. विद्यावारिधिप्रवेशपरीक्षायाः प्रमुखदिनाङ्काः (तात्कालिकाः) –

| क्र.सं | क्रियाकलापाः | दिनाङ्कः |
|---|---|---|
| 1. | अधितन्त्रिमाध्यमेन आवेदनार्थं प्रारम्भदिनाङ्कः | **12.06.2021** (शनिवासरः) आरभ्य |
| 2. | अधितन्त्रिमाध्यमेन आवेदनार्थं शुल्कपूरणार्थञ्च दिनाङ्काः (विलम्बशुल्करहितम्) | **12.06.2021** तः **12.07.2021** पर्यन्तम् |
| 3. | अधितन्त्रिमाध्यमेन विलम्बशुल्कसहितम् आवेदनार्थं दिनाङ्काः | **13.07.2021** तः **22.07.2021** पर्यन्तम् |
| 4. | अभ्यर्थीनाम् आवेदने संशोधनार्थं दिनाङ्काः | **23.07.2021** तः **26.07.2021** पर्यन्तम् |
| 5. | शैक्षिकविभागेन विद्यावारिधि - आवेदनपत्राणां संशोधनार्थं दिनाङ्काः | **27.07.2021** तः 30**.07.2021** पर्यन्तम् |
| 6. | विद्यावारिधिप्रवेशपरीक्षार्थम् अर्हच्छात्राणां/ प्रवेशपरीक्षामुक्तानां छात्राणां सूचीप्रकाशनस्य दिनाङ्कः | **31.07.2021**(शनिवासरः) |
| 7. | प्रवेशपत्रस्य अवारोपणदिनाङ्कः (उद्घोषितार्हच्छात्राणाम् एव) | **05.08.2021**(गुरुवासरः) आरभ्य |
| 8. | विद्यावारिधिप्रवेशपरीक्षायाः दिनाङ्कः | **11.08.2021** (बुधवासरः) (तात्कालिकम्) |
| 9. | विद्यावारिधिप्रवेशपरीक्षायाः तात्कालिक - उत्तरकुञ्चिकानां प्रकाशनदिनाङ्कः | **14.08.2021** (शनिवासरः) (तात्कालिकम्) |
| 10. | विद्यावारिधिप्रवेशपरीक्षायाः प्रश्नोत्तरेषु विद्यमानसन्देहाभ्यर्थनार्थम् अन्तिमदिनाङ्कः | 17**.08.2021** (मङ्गलवासरः) (तात्कालिकम्) |
| 11. | विद्यावारिधिप्रवेशपरीक्षायाः अन्तिम-उत्तरकुञ्चिकानां प्रकाशनदिनाङ्कः | 21**.08.2021** (शनिवासरः) (तात्कालिकम्) |
| 12. | परिणामाणाम् उद्घोषणदिनाङ्कः | **23.08.2021** (सोमवासरः) (तात्कालिकम्) |
| 13. | विद्यावारिधिपाठ्यक्रमस्य प्रथमपरामर्शदिनाङ्कः | **27.08. 2021** (शुक्रवासरः) (तात्कालिकम्) |

**सूचना : आवेदनार्थं पूरितः शुल्कः केनापि कारणेन न प्रत्यर्प्यते ।**

## 8. विद्यावारिधिप्रवेशपरीक्षायाः कृते न्यूनतमयोग्यता -

### अ. शास्त्रेषु विद्यावारिधिप्रवेशपरीक्षायाः कृते न्यूनतमयोग्यता

i. विद्यावारिधिप्रवेशपरीक्षार्थं सर्वेऽपि आवेदिताभ्यर्थिनः आचार्ये/ एम्.ए. संस्कृते (आवेदितशास्त्रे/विषये)/ तत्समकक्षपरीक्षायां (संस्कृतभाषायाम्) विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तविश्वविद्यालयात् न्यूनतमान् पञ्चपञ्चाशतं (55%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः ।

ii. अनुसूचितजातीयाः / अनुसूचितजनजातीयाः / अन्य-अप्रगतजातीयाः (OBC - Non Creamy layer) अन्यथासक्षमाः आवेदिताभ्यर्थिनः आचार्ये / एम्.ए.संस्कृते (आवेदितशास्त्रे / विषये) / तत्समकक्षपरीक्षायां (संस्कृतभाषायाम्) विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तविश्वविद्यालयात् न्यूनतमान् पञ्चपञ्चाशतं (50%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः ।

iii. वैदेशिकाभ्यर्थिनः आचार्ये / एम्.ए.संस्कृते (आवेदितशास्त्रे / विषये) / तत्समकक्षपरीक्षायां (संस्कृतभाषायाम्) मान्यताप्राप्तवैदेशिकविश्वविद्यालयात् न्यूनतमान् पञ्चपञ्चाशतं (55%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः । भारतसर्वकारस्य विदेशमन्त्रालयस्य शिक्षामन्त्रालयस्य च माध्यमेन विद्यावारिधिप्रवेशपरीक्षायाः कृते आवेदनं कर्तुम् अर्हाः भविष्यन्ति ।

iv. विद्यावारिधिप्रवेशपरीक्षायां तेऽपि अभ्यर्थिनः अर्हाः भविष्यन्ति, ये स्नातकोत्तरपरीक्षां लिखितवन्तः, परं परिणामं न प्राप्तवन्तः (PG pursuing candidates) । ते अभ्यर्थिनः विद्यावारिधिपाठ्यक्रमे पञ्जीकरणात् पूर्वं पूर्वनिर्धारितयोग्यतानुरूपम् अङ्कपत्राधिकम् अवश्यमेव समर्पयेयुः ।

v. ये अर्हच्छात्राः विश्वविद्यालयानुदानायोगेन सञ्चालितायां **नेट / स्लेट् / सेट्** (आवेदितशास्त्रे / विषये) इत्युपाधिं प्राप्तवन्तः अथवा **विशिष्टाचार्यपरीक्षायाम्** (आवेदितशास्त्रे / विषये) उत्तीर्णाः सन्ति ते अभ्यर्थिनः विद्यावारिधिप्रवेशपरीक्षायाः मुक्ताः भविष्यन्ति । परं ते अपि अवश्यं विद्यावारिधिप्रवेशपरीक्षायाः आवेदनं कुर्युः शुल्कः पूरयेयुः च ।

### आ. शिक्षाशास्त्रे विद्यावारिधिप्रवेशपरीक्षायाः कृते न्यूनतमयोग्यता -

i. ये शिक्षाशास्त्रविषये आवेदनं कर्तुमभिलषन्ति ते शिक्षाचार्य (M.Ed) परीक्षायाम् अथवा आचार्ये / एम्.ए. संस्कृते तत्समकक्षपरीक्षायां (संस्कृतभाषायाम्)/ M.Ed विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तविश्वविद्यालयात् न्यूनतमान् पञ्चपञ्चाशतं (55%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः, तेन सह स्नातकोत्तरस्तरे शिक्षायां (PG Degree in Education) पञ्चपञ्चाशतं (55%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः ।

ii. अनुसूचितजातीयाः / अनुसूचितजनजातीयाः / अन्य-अप्रगतजातीयाः (OBC - Non Creamy layer) अन्यथासक्षमाः आवेदिताभ्यर्थिनः शिक्षाचार्ये (M.Ed परीक्षायाम् अथवा आचार्ये / एम्.ए. संस्कृते तत्समकक्षपरीक्षायां (संस्कृतभाषायाम्)/ M.Ed विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तविश्वविद्यालयात् न्यूनतमान् पञ्चपञ्चाशतं (50%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः, तेन सह स्नातकोत्तरस्तरे शिक्षायां (PG Degree in Education) पञ्चपञ्चाशतं (50%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः ।

iii. वैदेशिकाभ्यर्थिनः शिक्षाचार्ये (M.Ed) परीक्षायाम् अथवा आचार्ये / एम्.ए. संस्कृते तत्समकक्षपरीक्षायां (संस्कृतभाषायाम्)/ M.Ed कस्माचिदपि मान्यताप्राप्तवैदेशिकविश्वविद्यालयात् न्यूनतमान् पञ्चपञ्चाशतं (55%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः, तेन सह स्नातकोत्तरस्तरे शिक्षायां (PG Degree in Education) पञ्चपञ्चाशतं (55%) प्रतिशताङ्कान् प्राप्य उत्तीर्णाः स्युः । भारतसर्वकारस्य

विदेशमन्त्रालयस्य शिक्षामन्त्रालयस्य च माध्यमेन विद्यावारिधिप्रवेशपरीक्षायाः कृते आवेदनं कर्तुम् अर्हाः भविष्यन्ति।

iv. विद्यावारिधिप्रवेशपरीक्षायां तेऽपि अभ्यर्थिनः अर्हाः भविष्यन्ति, ये शिक्षाचार्यपरीक्षाम् अथवा शिक्षायाम् एम्.ए., आचार्य/एम्.ए. संस्कृतम्/ M.Ed परीक्षां लिखितवन्तः, किन्तु परिणामं न प्राप्तवन्तः । परं तादृशाः अभ्यर्थिनः विद्यावारिधिपाठ्यक्रमे पञ्जीकरणात् पूर्वं पूर्वनिर्धारितयोग्यतानुरूपम् अङ्कपत्रम् अवश्यमेव समर्पयेयुः ।

v. ये अर्हच्छात्राः विश्वविद्यालयानुदानायोगेन सञ्चालितायां **नेट/स्लेट्/सेट्** (शिक्षाशास्त्रे) इत्युपाधिं प्राप्तवन्तः अथवा **शिक्षाशास्त्रे विशिष्टाचार्यकक्षायां** उत्तीर्णाः सन्ति, ते विद्यावारिधिप्रवेशपरीक्षायाः मुक्ताः भविष्यन्ति। परं ते अपि अवश्यं विद्यावारिधिप्रवेशपरीक्षायाः आवेदनं कुर्युः शुल्कं पूरयेयुः च।

**सूचनाः -**

- **विशिष्टाचार्यकक्ष्यायाम् अधीयानाः छात्राः विद्यावारिधिप्रवेशपरीक्षातः मुक्ताः न भविष्यन्ति।**
- विद्यावारिधिप्रवेशपरीक्षायाः आवेदनानि राष्ट्रियसंस्कृतविश्वविद्यालयस्य शैक्षिकानुभागेन परिशील्यन्ते । ततः परं अर्हच्छात्राणां सूची निर्मीयते, सूच्यां ये अर्हच्छात्राः भविष्यन्ति ते एव छात्राः प्रवेशपरीक्षां दातुमर्हन्ति। तेन सह परीक्षामुक्तानां छात्राणां च सूची प्रकाश्यते। समालोचनान्तरम् अनर्हच्छात्रैः पूरितः प्रवेशशुल्कः केनापि कारणेन न प्रत्यर्प्यते।

## 9. चयनप्रक्रिया -

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः वरीयताक्रमेण विद्यावारिधिपाठ्यक्रमे प्रवेशं प्रदास्यति । **विद्यावारिधिप्रवेशपरीक्षा केवलम् अर्हतानिमित्तमेव भविष्यति न तु विद्यावारिधिपाठ्यक्रमे प्रवेशाय।**

प्रवेशपरीक्षायाः परिणामोद्घोषणानन्तरं विभागशः (शास्त्रम्/विषयः) प्रवेशपरीक्षायाम् उत्तीर्णच्छात्रान् प्रवेशपरीक्षायाः मुक्तच्छात्रान् च संयोज्य एका एव सूची निर्मास्यते।

उपरिनिर्दिष्टाः (प्रवेशपरीक्षायाम् उत्तीर्णाः मुक्ताश्च) सर्वेऽपि छात्राः विद्यावारिधिपाठ्यक्रमे प्रवेशार्थं विभागानुसन्धानसमितेः (DRC) सूचनानुगुणम् उपस्थिताः भवेयुः । विभागानुसन्धानसमितिः (DRC) राष्ट्रियसंस्कृतविश्वविद्यालयस्य नियमावल्यनुगुणं मानकानुगुणं च श्रेणीनां (rank) निर्माणं कृत्वा वरीयताक्रमेण विद्यावारिधिपाठ्यक्रमे प्रवेशार्थं सूचीं निर्माय विश्वविद्यालयस्य जालस्थाने (website) आरोपयिष्यति।

## 10. विद्यावारिधिपाठ्यक्रमशुल्कः - 3500/- प्रतिवर्षम्

## 11. छात्रावास-भोजनादीनाञ्च शुल्कः

विद्यावारिधिपाठ्यक्रमे प्रविष्टच्छात्राणां कृते छात्रावासादिव्यवस्था परिकल्प्यते। छात्रावासस्य भोजनस्य च शुल्कः पृथग्रूपेण शोधार्थिना एव प्रदेयः।

## 12. विद्यावारिधिपाठ्यक्रमस्य अध्ययनकेन्द्रम् -

**राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः**

| | |
|---|---|
| **राष्ट्रियसंस्कृतविश्वविद्यालयः,**<br>तिरुपतिः (आन्ध्रप्रदेशः) – 517507<br>जनपदम् – चित्तूर (आ.प्र) | समायोजकः, प्रवेशपरीक्षा - 9494480515<br>सङ्कायप्रमुखः, शिक्षासङ्काय- 0877-2288886<br>वैद्युतीयपत्रसङ्केतः – **nsucet@gmail.com** |

## 13. विद्यावारिधिप्रवेशपरीक्षा (VVET) - २०२१ दिनाङ्कः समयश्च (तात्कालिकः) -

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः **2021 तमवर्षस्य अगष्टमासस्य 11** दिनाङ्के मध्याह्ने **02.30 तः 04.00** पर्यन्तं देशस्य विविधकेन्द्रेषु विद्यावारिधिप्रवेशपरीक्षां चालयिष्यति । अर्हच्छात्राः अधितन्त्रिमाध्यमेन (Online) निर्दिष्टदिनाङ्कात् पूर्वम् आवेदनं कुर्युः । आवेदानार्थं विश्वविद्यालयस्य जालपुटं परिशीलयत - **http://nsktu.ac.in**

## 14. अधितन्त्रिमाध्यमेन आवेदनार्थं निर्देशाः –

1. अस्यां प्रवेशपरीक्षाविषयिकाः आवश्यकसूचनाः सङ्कलिताः ।
2. एषा निर्देशिका ध्यानेन पठनीया ।
3. अधितन्त्रि - आवेदनं ध्यानेन पूरणीयम् ।
4. अधितन्त्रि - आवेदने पूरितानां तथ्यानां सत्यापनं परीक्षासमये प्रवेशसमये च भविष्यति ।
5. कस्यचित् तथ्यस्य असत्यत्वे प्रमाणिते सति, यथानियमं न्यायिकदण्डः, परीक्षायाः निष्कासनम् / प्रवेशनिरस्तीकरणम् इत्यादिकं यथायोग्यं प्रकल्पयिष्यते ।
6. अधितन्त्रि-आवेदने छायाचित्रं स्पष्टं नवीनतमं च स्यात् । परीक्षासमये प्रवेशसमये वा यदि छायाचित्रस्य मेलनं न भविष्यति तर्हि परीक्षायाः निष्कासनं / प्रवेशनिरस्तीकरणं यथानियमं न्यायिकदण्डव्यवस्था अपि करिष्यते।
7. **अभ्यर्थिना प्रदत्ता चलदूरवाणीसंख्या प्रवेशप्रक्रियासमाप्तिपर्यन्तं स्थापनीया, यतः प्रवेशपरीक्षासम्बन्धिन्यः सर्वाः सूचनाः प्रदत्तायाः चलदूरवाणीसंख्यायाः कृते एव प्रेष्यन्ते ।**
8. केवलमर्हप्रार्थिभिः प्रवेशपरीक्षायां सम्मिलितैर्भाव्यम् । यदि कश्चिद् पूर्वनिर्धारितशैक्षिकयोग्यतायाः अभावे (appearing candidates) अपि प्रवेशपरीक्षायाम् उत्तीर्णश्चेत् विद्यावारिधिपाठ्यक्रमप्रवेश सन्दर्भे सः अभ्यर्थी पूर्वनिर्धारितयोग्यताप्रमाणपत्रम् अनिवार्यरूपेण प्रदर्शयेत्। अन्यथा तस्य प्रवेशः निरस्तः भविष्यति।
9. राष्ट्रियसंस्कृतविश्वविद्यालयेन विद्यावारिधिपाठ्यक्रमे निर्धारितसंख्यानुसारं योग्यताक्रमानुसारेण एव प्रवेशः प्रकल्पयिष्यते ।
10. प्रवेशार्हतापरिशीलनम् आरक्षणादीनां निश्चयश्च, एतत्सर्वं UGC नियमानुगुणं राष्ट्रियसंस्कृतविश्वविद्यालयस्य अधीनं वर्तते ।
11. प्रवेशविषये राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतेः निर्णय एव अन्तिमः ।
12. विद्यावारिधिप्रवेशपरीक्षायाः प्रवेशसमये परीक्षाप्रकोष्ठे प्रवेशपत्रं विना प्रवेशः न भविष्यति ।
13. न्यायिकविषयेषु अमरावती (आन्ध्रप्रदेशः) उच्चन्यायालयस्य एव क्षेत्राधिकारः भविष्यति ।

## 15. कतिचन प्रमुखाः सूचनाः -

अभ्यर्थिना विद्यावारिधिप्रवेशपरीक्षायाः आवेदनम् अधितन्त्रिमाध्यमेन राष्ट्रियसंस्कृतविश्वविद्यालयस्य जालस्थानकतः एव (website - **http://nsktu.ac.in**) करणीयम् ।

विद्यावारिधिप्रवेशपरीक्षायां सफलच्छात्राणाम् एव वरीयतानुसारेण आरक्षणानुगुणं विद्यावारिधिपाठ्यक्रमे प्रवेशः भविष्यति ।

**राष्ट्रियसंस्कृतविश्वविद्यालयस्य विद्यावारिधिपाठ्यक्रमप्रवेशसमये विद्यावारिधिप्रवेशपरीक्षायाः (२०२१) मूलप्रवेशपत्रं** (Original Admit Card) **समर्पणीयम् ।**

## 16. प्रवेशपरीक्षायाः केन्द्राणि -

परीक्षाकेन्द्रनिर्धारणं छात्रप्रदत्तसूचनानुसारमेव भविष्यति । अतः छात्रः सावधानतया परीक्षाकेन्द्रस्य चयनं कुर्यात् । केन्द्रनिर्धारणानन्तरं किमपि परिवर्तनं न भविष्यति । निर्धारितकेन्द्रे एव परीक्षा लेखनीया ।

| क्र.सं. | परीक्षाकेन्द्राणि | क्र.सं. | परीक्षाकेन्द्राणि |
|---|---|---|---|
| 1. | Tirupati | 11. | Bargarh |
| 2. | Vijayawada | 12. | Balasore |
| 3. | Visakhapatnam | 13. | Kolkata |
| 4. | Hyderabad | 14. | Nagpur |
| 5. | Chennai | 15. | Bhopal |
| 6. | Bengaluru | 16. | Varanasi |
| 7. | Thrissur | 17. | Patna |
| 8. | Bhubaneswar | 18. | Delhi |
| 9. | Cuttack | 19. | Jaipur |
| 10. | Sambalpur | 20. | Guwahati |

प्रवेशपरीक्षकेन्द्रनिर्धारणं अभ्यर्थिना प्रदत्तसूचनानुसारमेव भविष्यति । अतः अभ्यर्थी सावधानतया परीक्षाकेन्द्रस्य चयनं कुर्यात् । प्रवेशपरीक्षायाः केन्द्रनिर्धारणानन्तरम् अभ्यर्थी तत् केन्द्रं परिवर्तयितुं न शक्नोति । निर्धारितकेन्द्रे एव परीक्षा प्रदेया । **एकस्मिन् केन्द्रे न्यूनातिन्यूनं 25 अभ्यर्थिनः भवेयुः । यदि अभ्यर्थीनां संख्या पञ्चविंशतेः (25) अपेक्षया न्यूना स्यात् तर्हि विश्वविद्यालयेन तत्समीपस्थं केन्द्रं प्रवेशपरीक्षार्थं प्रदीयते ।**

## 17. प्रवेशपरीक्षापद्धतिः

सङ्गणकाधारितपरीक्षा **(Computer Based Test - CBT)** : नाम अभ्यर्थी सङ्गणकयन्त्रस्य पुरतः उपविशति । सङ्गणकयन्त्रे प्रश्नाः प्रदर्शिताः भविष्यन्ति ततः Keyboard or mouse साहाय्येन समीचीनम् उत्तरं देयम् । सर्वेऽपि प्रश्नाः संस्कृतमाध्यमेन एव भविष्यन्ति। अभ्यर्थिना सपदि एकमेव प्रश्नं तत्सम्बद्धं विकल्पचतुष्टयं च द्रष्टु प्रभवति ।

## 18. प्रवेशपरीक्षार्थं निर्दिष्टावधिः

विद्यावारिधिप्रवेशपरीक्षायाः अवधिः **सार्धैकघण्टा (1½ hrs.) (90.निमेषाः)** एव ।

## 19. प्रवेशपरीक्षायाम् अवधेयाः सूचनाः

- विद्यावारिधिप्रवेशपरीक्षायाः प्रवेशसमये परीक्षाप्रकोष्ठे प्रवेशपत्रं विना प्रवेशः न भविष्यति ।
- विद्यावारिधिप्रवेशपरीक्षायाम् अवैधसाधनानि अवलम्बयन् उत्तराणि प्रदातुम् अन्यतः साहाय्यं प्राप्नुवन् अनुशासनहीनतां वा प्रदर्शयन् परीक्षार्थी केन्द्राध्यक्षेण सद्यः परीक्षाया बहिष्करिष्यते यथाविधि दण्डनं वा करिष्यते ।
- छायाचित्रेण सह वैषम्ये सति, सन्देहे जाते, परीक्षातः निलम्बनम्/ प्रवेशात् निलम्बनम् / विधिवत् दण्डनं वा करिष्यते। तदर्थं छात्रः स्वयम् उत्तरदायी भविष्यति।
- परीक्षाभवने गणकयन्त्रं, चलदूरवाणी, स्मार्ट घटी इत्यादिकं सर्वथा वर्जितम्।
- सर्वेऽपि अभ्यर्थिभिः Covid-19 सूचनाः अवश्यमेव पालनीयाः।

## 20. शास्त्राणां/विषयाणां प्रश्नपत्रप्रारूपम् –

**एकाङ्कीया: बहुविकल्पात्मका: शतं प्रश्ना: भागद्वये विभक्ता: भविष्यन्ति । तद्यथा -**

| भागा: | विषय: | प्रश्ना: | अङ्का: |
|---|---|---|---|
| A | अनुसन्धानपद्धति: | 50 | 50 |
| B | सम्बद्धशास्त्रम्/विषय: | 50 | 50 |
| योग: | | **100** | **100** |

## 21. शिक्षाशास्त्रस्य प्रश्नपत्रप्रारूपम् –

**एकाङ्कीया: बहुविकल्पात्मका: शतं प्रश्ना: भागद्वये विभक्ता: भविष्यन्ति । तद्यथा -**

| भागा: | विषय: | प्रश्ना: | अङ्का: |
|---|---|---|---|
| A | शिक्षानुसन्धानपद्धति: | **50** | **50** |
| B | शिक्षाशास्त्रम् | **50** | **50** |
| योग: | | **100** | **100** |

## 22. मूल्याङ्कनविधि:उत्तीर्णतायै प्रतिशताङ्काश्च -

- सङ्गणाकाधारितं मूल्याङ्कनं भविष्यति।
- आहत्य 50% पञ्चाशतप्रतिशतात्मक – प्राप्ताङ्का: छात्रा: एव प्रवेशपरीक्षायाम् उत्तीर्णा: इति विश्वविद्यालयेन उद्घोष्यते ।

**सूचना: -**

- विद्यावारिधिप्रवेशपरीक्षायाम् उत्तीर्णानां सर्वेषां छात्राणां विद्यावारिधिपाठ्यक्रमे स्थानप्राप्त्यधिकार: नैव भविष्यति । अत: तदर्थम् आक्षेपा: नैव करणीया: ।
- विद्यावारिधिप्रवेशपरीक्षा केवलम् अर्हताप्राप्त्यर्थमेव भविष्यति, न तु विद्यावारिधिपाठ्यक्रमे प्रवेशाय ।
- विद्यावारिधिप्रवेशपरीक्षायां सफलच्छात्राणाम् एव वरीयतानुसारम् आरक्षणानुगुणं च विश्वविद्यालयस्य नियमावल्यानुगुणं विद्यावारिधिपाठ्यक्रमे प्रवेश: भविष्यति ।

## 23. फलितांशाः -

i. विद्यावारिधिप्रवेशपरीक्षायाः परिणामस्य वरीयतानुक्रमेण सूची विश्वविद्यालयस्य जालपुटे आरोप्यते।

ii. राष्ट्रियसंस्कृतविश्वविद्यालयः स्वप्रवेशनीतिमनुसृत्य प्रवेशं कल्पयिष्यति।

## 24. विद्यावारिधिप्रवेशपरीक्षायाः पाठ्यक्रमः - २०२१

### Section A - अनुसन्धानपद्धतिः (Common for All Shastras)

**Number of MCQ 50** **Max. Marks - 50**

**I. अनुसन्धान (Research) पदव्याख्यानम्**

1) Research पदेनसमानार्थकानाम् "अनुसन्धानम्", "गवेषणम्", "संशोधनम्", "परिशोधनम्"
2) संस्कृतवाङ्मयेअनुसन्धानस्यप्राचीनता, उदाहरणानि च।
3) संस्कृतवाङ्मयेअनुसन्धानस्यआवश्यकतातत्प्रयोजनञ्च।

**II. अनुसन्धानस्यस्वरूपम्, सीमा च**

1. अनुसन्धानस्यस्वरूपम्। 2. अनुसन्धानसोपानानि।

3. संस्कृतवाङ्मयेअनुसन्धानस्यसीमा।

अ) वैदिक-लौकिक-दर्शनवाङ्मयम्। इ) मातृकाभ्यःपाठसमीक्षात्मकसम्पादनम्।

आ) ग्रन्थानांसमीक्षात्मकमध्ययनम्। ई) संस्कृतविदुषांव्यक्तित्वंकृतित्वञ्च।

**III. अनुसन्धानविषयचयनेअवधेयाःअंशाः**

1) अ) अभिरुचिः आ) योग्यता इ) विषयस्यप्राधान्यम् ई) सामग्रीणामुपलब्धिः

उ) स्पष्टत्वम् ऊ) अध्ययनयोग्यत्वम् ऋ) समाधानयोग्यत्वम्इत्यादयः।

2) अनुसन्धानविषयचयनप्रक्रिया।

**IV. a) सामग्रीसङ्कलनम्, तत्स्रोतांसि**

1) प्राथमिकस्रोतांसि – मूलग्रन्थाः, व्याख्याः, पुरातत्त्वाधारः, शिलाशासनानि, शासकीयानिअभिलेखानि च।
2) आनुषङ्गिकस्रोतांसि – साहित्येतिहासः, ग्रन्थसूची, शोधपत्रिकाः, कोशाः, लेखनानि च।
3) आधुनिकोपकरणानि – अन्तर्जालम्, जालस्थानानि, ई-शोधपत्रिकाः, ई-कोशाः।
4) ग्रन्थालयः, ग्रन्थालयप्राप्यप्रयोजनानि।

**b) सम्बद्धसाहित्यस्यअध्ययनम्**

**V. अनुसन्धानप्रकाराः**

1) सर्वेक्षणम्। 2) शास्त्रीयम्। 3) तुलनात्मकम्।

4) समस्यामूलकम्। 5) क्षेत्रीयम्। 6) विमर्शात्मकम्अध्ययनम्।

7) वर्णनात्मकंव्याख्यानात्मकञ्चअध्ययनम्।

**VI. a) भारतेविद्यमानाःप्रसिद्धाःप्राच्यपरिशोधनसंस्थाः**(Oriental Research Institutes) **तासांकार्यप्रणाली च।**

**b) राष्ट्रियपाण्डुलिपिमिशन**(National Manuscript Mission)

## Section B - Concerned Shastra / Subject 50 -Marks

| क्रम.सं | शास्त्राणि/विषयाः | प्रवेशपरीक्षायाः पाठ्यक्रमाः |
|---|---|---|
| 1. | सांख्ययोगः | सांख्यकारिका – ईश्वरकृष्णः, योगसूत्राणि - पतञ्जलिः |
| 2. | मीमांसा | अर्थसंग्रहः , न्यायप्रकाशः |
| 3. | न्यायः | न्यायसिद्धान्तमुक्तावलिः - प्रत्यक्षानुमानशब्दखण्डाः |
| 4. | आगमः | पाद्मसंहिता (ज्ञानपादःएवं योगपादः) |
| 5. | अद्वैतवेदान्तः | सिद्धान्तलेशसंग्रहः - अप्पयदीक्षितेन्द्रः |
| 6. | व्याकरणम् | परिभाषेन्दुशेखरः - 1-20 परिभाषाः,<br>महाभाष्यम् – पष्पशाह्निकम् |
| 7. | वेदभाष्यम् | निरुक्तम् (सप्तमोध्यायः),<br>ऋग्वेदभाष्यभूमिका- (सायणाचार्यकृतम्) |
| 8. | द्वैतवेदान्तः | विष्णुतत्त्वविनिर्णयः – वेदापौरुषेयत्वसमर्थनपर्यन्तम् |
| 9. | साहित्यम् | काव्यप्रकाशःआदितःषडुल्लासाः<br>दशरूपकम्- प्रथमद्वितीयतृतीयप्रकाशा एव |
| 10. | शाब्दबोधः | न्यायसिद्धान्तमुक्तावली- शब्दखण्डः<br>परमलघुमंजूषा - शक्ति-लक्षणा-व्यंजना-धात्वर्थ-नामार्थप्रकरणानि |
| 11. | विशिष्टाद्वैतवेदान्तः | श्रीवेदान्तदेशिकविरचितन्यायसिद्धञ्जनेजीवेश्वरपरिच्छेदौ |
| 12. | फलितज्योतिषम् | बृहद्जातकम् – (प्रथमाध्यायात्दशमाध्यायपर्यन्तम्) |
| 13. | सिद्धान्तजोतिषम् | सूर्यसिद्धान्तःप्रथमाध्यायात्तृतीयाध्यायपर्यन्तम्<br>(मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारः) |

**Section – A : Educational Research Methodology (For Education)**

**Number of MCQ 50** **Max. Marks - 50**

1. **अनुसन्धानपद्धतयः – ऐतिहासिकविधिः, वर्णनात्मकविधयः, प्रयोगात्मकविधिः**
2. **सम्बद्धसाहित्याध्यायनस्यमहत्त्वम्, उपयोगिता, लाभाः**
3. **न्यादर्शचयनप्रविधयः**

   a) सामान्ययादृच्छिकन्यादर्शः c) स्तरीकृतयादृच्छिकन्यादर्शः

   b) क्रमबद्धयादृच्छिकन्यादर्शः d) सोद्देश्ययादृच्छिकन्यादर्शः
4. **अनुसन्धानोपकरणानि**

   a) प्रश्नावलिः c) अभिवृत्तिमापनी

   b) साक्षात्कारः d) मनोवैज्ञानिकपरीक्षणानि
5. **शिक्षायाम्अनुसन्धानक्षेत्राणि**

   a) भाषाशिक्षणक्षेत्रम् c) छात्रसमस्याः

   b) अध्यापकसमस्याः d) अध्यापकशिक्षासमस्याः

## विद्यावारिधिप्रवेशपरीक्षा – 2021 (शिक्षाशास्त्रम् - पाठ्यक्रमः)

## Section – B

**I. शिक्षादर्शनं समाजशास्त्रञ्च**

1. शिक्षादर्शनम्, शिक्षायाःप्रकाराःकार्याणि च
2. शिक्षायाःउद्देश्येषु आदर्शेषु पाठ्यचर्यायां गुरुशिष्यसम्बन्धेषु दार्शनिक विचारधारायाःप्रभावः।
3. आदर्शवादः, प्रकृतिवादः, यथार्थवादः, व्यवहारवादः च
4. मूल्यप्रकाराः –व्यक्तिगत,सामाजिक, आध्यात्मिकमूल्यानि च।
5. समाजिकीकरणस्य अभिकरणानि (कुटुम्बम्, विद्यालयः, समवयस्कगणः)

**II. शिक्षामनोविज्ञानम्**

1. अधिगमः
2. बुद्धिः
3. व्यक्तित्वम्
4. स्मृतिः
5. अभिवृत्तिः

**III. भारतीयशिक्षायाःइतिहासःसमस्याश्च**

1. संविधानेशिक्षासम्बद्धाःधाराः (Articles)
2. स्वातन्त्र्योत्तरकालीनशिक्षायोगाः
3. राष्ट्रियशिक्षानीतिः 1986, कार्ययोजना 1992
4. राष्ट्रियशिक्षानीतिः - 2020
5. UGC, NCERT, NCTE, NAAC. एतासां संस्थानां सामान्यपरिचयः

**IV. संस्कृतशिक्षणम् – शास्त्रशिक्षणम् (साहित्यं व्याकरणं च)**

1. संस्कृतशिक्षणविधयः
2. भाषाकौशलानि
3. दृश्यश्रव्योपकरणानि

4. साहित्यशिक्षणविधयः- टीकाविधिः, कथाकथनविधिः

5. व्याकरणशिक्षणविधयः - सूत्रविधिः, भाष्यविधिः, परियोजनाविधिः

**V. शैक्षिकतन्त्रज्ञानम्**

1. अध्यापनस्तराः- स्मृतिस्तरः, अवबोधस्तरः, स्वतन्त्रस्तरः

2. भाषाप्रयोगशाला, अभिक्रमिताधिगमः, सूक्ष्मशिक्षणं च

3. विविधप्रकारक – प्रक्षेपक – अप्रक्षेपक – साधनानितेषाम् उपयोगश्च

4. सम्प्रेषणम्- प्रकाराः

5. सङ्गणकसहकृताधिगमः (CAL), सङ्गणकसहकृतानुदेशनम्

**25. आदर्शप्रश्नाः -**

अधः प्रदत्तं Link उपयुज्य आदर्शप्रश्नान् द्रष्टुम् शक्नुवन्ति ।

**https://drive.google.com/drive/folders/1tG27QGR7z2nU3s8I8pOUftuQZHYB3IOR?usp=sharing**

*****